ईशावास्यादिभिर्मन्त्रैः तुष्टावावहितात्मना ॥

* * * *

भागवते चायमर्थ एवोक्तः ईशस्य आवास्यम् ईशावास्यं जगत्यां प्रकृतौ तेन ईशेन त्यक्तेन दत्तेन भुञ्जीथाः स्वतः प्रवृत्तावत्यशक्तत्वादीशावास्यमिदं जगत् . . . .

End:

जुहुराणम् अस्मानल्पीकुर्वत् युयोधि वियोजय
यदस्मान् कुरुतेऽत्यल्पांस्तदेनोऽस्मद्वियोजय ।
नयनो मोक्षवित्तायेत्यस्तौदच्यज्ञं मनुस्स्वराट् ॥

इति स्कान्दे युयुर्वियोग इति धातुः
भक्तिज्ञानाभ्यां भूयिष्ठां ते नमउक्तिं विधेम ।

पूर्णशक्तिचिदानन्दश्रीतेजस्पष्टमूर्तये ।
ममाभ्यधिकामित्राय नमो नारायणाय ते ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितमीशावास्योपनिषद्भाष्यं समाप्तम् ॥

No. 318 ईशावास्योपनिषद्भाष्यम्.
ĪŚĀVĀSYŌPANIṢADBHĀṢYAM.

Pages, 6. Lines, 12 on a page.

Complete; same as the last.

Begins on fol. 1*a* of the MS. described under No. 309.

No. 319. ईशावास्योपनिषद्भाष्यम्.
ĪŚĀVĀSYŌPANIṢADBHĀṢYAM.

Pages, 39. Lines, 8 on a page.

Complete. Begins on fol. 20*a* of the MS. described under No. 305.

A commentary on the Īs'āvāsyōpaniṣad according to the Viśiṣṭādvaita school by Vēṅkaṭanātha, generally known by the name of Vēdāntācārya or Vēdāntadēśika.

Beginning:

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥
येनावास्यमिदं सर्वं चेतनाचेतनात्मकम् ।
विशुद्धसद्गुणौघं तं वासुदेवमुपास्महे ॥
सर्वेशानस्सहजमहिमा सर्वभूतान्तरात्मा
सर्वान्दोषान् स्वयमतिपतन् सर्वविद्यैकवेद्यः ।
कर्माध्यक्षः कलुषशमनः कोऽपि मुक्तोपभोग्यः
सिद्धोपायस्स्फुरति पुरुषो वाजिनां संहितान्ते ॥
ईशावास्यमिदं सर्वमित्यादिर्यदनूच्यते ।
शिष्यं प्रति गुरोरेतत् ब्रह्मविद्यानुशासनम् ॥

संभूतोदाहृतं सर्वं विनियोगपृथक्त्वतः ।
विद्यार्थं स्यादिति व्यक्तं निबद्धोऽस्य तदन्ततः ॥

तत्र प्रथममचिद्विकाराधिष्ठितस्य स्वतन्त्रात्मभ्रमादिपरिजिहीर्षया सर्वस्य परमपुरुषायत्तस्वरूपस्थितिप्रवृत्तिमभिप्रेत्याह ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगदिति । इदं तत्तत्प्रमाणसिद्धमीश्वरव्यतिरिक्तं चिदचिदात्मकं "ज्ञाज्ञौ द्वावजावीशानीशौ" इत्यादिषु जीवात् अत्यन्त-विलक्षणतया प्रख्यातेन सर्वनियन्त्रा पुरुषोत्तमेनावास्यं व्याप्यमित्यर्थः.

End:

एवं परतत्त्वतद्विभूतियोगतदुपासनातद्विशेषान् सङ्गृह्य संहितेयं समपूर्यत ॥ 18 ॥

व्यक्ताव्यक्ते वाजिनां संहितान्ते
व्याख्यामित्थं वाजिवक्त्रप्रसादात् ।
वैश्वामित्रो विश्वमित्रं व्यातानी-
द्विद्वच्छात्रप्रीतये वेङ्कटेशः ॥

अभेदं भोक्तॄणामथ च भविनामेव परतां
तथा भेदाभेदं जिनसुगतनीतीश्च जगति ।
असंपाद्यां मुक्तिं भवभयमलीकं च पठता-
मसावीशेत्यादि (र्न) कथमनुवाकः प्रतिभटः ॥

Colophon:

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य मम नाथस्य वेदान्ताचार्यस्य कृतिषु ईशावास्यभाष्यं संपूर्णम् ॥

परमैकान्तिपुत्रेण प्रसन्नेनाज्ञबुद्धिना ।
लिखितं तु मया पर्णं (?) भाष्यमीशावास्यस्य नामतः ॥

No. 320. एकाक्षरोपनिषत्.

ĒKĀKṢARŌPANIṢAD.

Pages, 3. Lines, 21 on a page.

Complete. Begins on fol. 41*b* of the work described under No. 246.

As the name signifies, this Upaniṣad treats of the one syllable ओम्, which, it is declared, manifests the attributes, such as the immortality, omnipotence and unity of the Supreme Soul.

Beginning:

सह नाववत्विति शान्तिः.

एकाक्षरं त्वक्षरेतोऽसि सोमे सुषुम्नया चेह दृढी न एक । त्वं विश्वभूर्भूतपतिः पुराणः पर्जन्य एको भुवनस्य गोप्ता । विश्वे निमग्नः पदवीः कवीनां त्वज्ञातवेदो भुवनस्य नाथः ।

End:

त्वं भूर्भुवस्स्वस्त्वं हि स्वयंभूरथ 'विश्वतोमुखः । य एवं नित्यं वेदयते गुहाशयं प्रभुं पुराणं सर्वभूतं हिरण्मयम् । हिरण्मयं बुद्धिमतां परां गतिं स बुद्धिमान् बुद्धिमतीत्य तिष्ठतीत्युपनिषत् ॥

Colophon:

एकाक्षरोपनिषत्समाप्ता ॥

No. 321. एकाक्षरोपानिषत्.

ĒKĀKṢARŌPANIṢAD.

Page, 1. Lines, 13 on a page.

Complete.

Begins on fol. 135*b* of the MS. described under No. 247.

No. 322. एकाक्षरोपनिषत्.

ĒKĀKṢARŌPANĪṢAD.

Substance, palm-leaf. Size, 12¼ × 1¼ inches. Pages, 3. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Incomplete. Full of errors.

Begins on fol. 16*b*. The other works herein are Muṇḍakōpaniṣad (1*a*), Kaivalyōpaniṣad (9*a*), Vēdāntagranthaḥ (11*a*), Mahāvākyārthavivaraṇam (12*b*), Brahmabindūpaniṣad (15*a*), Tējōbindūpaniṣad (15*b*), Dhyānakramaḥ (18*a*), Praṇavamantraḥ (19*a*), Bhāgavatam (22*a*,) Āturasannyāsavidhiḥ (33*a*), Vyāsapūjāvidhiḥ (35*a*), Kramasannyāsavidhiḥ (38*a*), Śvētakētukōpaniṣad (47*a*), Mṛttikāsnānam (59*a*), Bhāgavatadharmāḥ (59*b*).

No. 323. ऐतरेयोपनिषत्.

AITARĒYŌPANIṢAD.

Substance, palm-leaf. Size, 17¾ × 1½ inches. Pages, 5. Lines, 6 on a page. Character, Telugu. Appearance, new. In good order.

Complete.

Begins on fol. 1*a*. The other work herein is Aitarēyōpaniṣadbhāṣyam (3*b*).

This Upaniṣad is one of the Daśōpaniṣads and forms part of the Āraṇyaka of the Ṛgvēda and consists of Adhyāyas 4 to 7 of the second Praśna.

It teaches that Ātman is the cause of the manifested universe, that the knowledge of Ātman which leads to salvation is the result of renunciation, and that the nature of Ātman is consciousness though variously thought of.

Beginning:

आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किञ्चन मिषत्स ईक्षत लोकान्नु सृजा इति। स इमाँल्लोकानसृजताम्भो मरीचिर्मरमापोऽदोऽम्भः परेण दिवं द्यौः प्रतिष्ठान्तरिक्षं मरीचयः पृथिवी मरो या अधस्तात्ता आपः। स ईक्षते मे नु लोकान् लोकपालान्नु सृजा इति

End:

स एतेन प्रज्ञानात्मनास्माल्लोकादुत्क्रम्यामुष्मिन् स्वर्गे लोके सर्वान् कामानाप्त्वामृतः समभवत् समभवत् ॥7॥ वाङ्मे मनसि प्रतिष्ठितेति शान्तिः . . आत्मा वै षट्

Colophon:

आत्मषट्कं समाप्तम् ॥

No. 324. ऐतरेयोपनिषत्.
AITARĒYŌPANIṢAD.

Pages, 9. Lines, 10 on a page. Correct. Slightly injured.

Begins on fol. 31*a* of the MS. described under No. 180.
Complete.

No. 325. ऐतरेयोपनिषत्.
AITARĒYŌPANIṢAD.

Pages, 6. Lines, 8 on a page. Appearance, very old.

Complete.
Begins on fol. 72*b* of the MS. described under No. 276.

No. 326. ऐतरेयोपनिषत्.
AITARĒYŌPANIṢAD.

Pages, 23. Lines, 6 on a page.

Complete.
Begins on fol. 1*a* of the MS. described under No. 304.

This codex contains the whole of the second Praśna of the Āraṇyaka.

The second and third Praśnas of the Aitarēya-Āraṇyaka are known by the general name of Upaniṣad, sometimes as Bahvṛcōpaniṣad or Mahaitarēyōpaniṣad, while Adhyāyas 4 to 7 of the second Praśna are more particularly named as the Aitarēyōpaniṣad. Hence the MS. under notice gives the whole of the second Praśna as the Aitarēyōpaniṣad; and it is for the same reason obviously that the commentary on this Upaniṣad by Śaṅkarācārya deals with the whole of the second Praśna, as may be seen from No. 331.

Beginning:

भूमिमुपस्पृशेदग्न इदा · · सन्दृशि । भद्रं क · · · · युः । · · · · · · · · · · · · वाङ्मे मनसि प्रतिष्ठिता । · · · ओं शान्तिः शान्तिः शान्तिः । एष पन्था एतत्कर्मैतद्ब्रह्मैतत्सत्यं तस्मान्न प्रमाद्येत्

No. **327.** ऐतरेयोपनिषत्.

AITARĒYŌPANIṢAD.

Pages, 8. Lines, 5 on a page.

Complete.

Begins on fol. 32*a* of the MS. described under No. **139**.

The Śānti given herein is that which begins with भद्रं कर्णेभिः

No. **328.** ऐतरेयोपनिषत्.

AITARĒYŌPANIṢAD.

Pages, 9. Lines, 12 on a page.

Complete.

Begins on fol. 337*a* of the MS. described under No. **302**.

No. 329. ऐतरेयोपानिषत्.

AITARĒYŌPANIṢAD.

Pages, 6. Lines, 7 on a page.

Complete.

Begins on fol. 32*a* of the MS. described under No. 306.

No. 330. ऐतरेयोपनिषद्भाष्यम्.

AITARĒYŌPANIṢADBHĀṢYAM.

Pages, 30. Lines, 7 on a page.

Complete.

Begins on fol. 3*b* of the MS. described under No. 323.

This is a commentary on the Aitarēyōpaniṣad by Śaṅkarācārya according to the Advaitavēdānta.

Beginning:

नमो ब्रह्मादिभ्यो ब्रह्मविद्यासम्प्रदायकर्तृभ्यो नमो गुरुभ्यो वंशऋषिभ्यः। परिसमाप्तं कर्म सह परब्रह्मविषयज्ञानेन। एषा कर्मणो ज्ञानस्य परा गतिरुक्थतद्विज्ञानद्वारेण उपसंहृतत्वात्सत्यं ब्रह्म प्राणाख्यमेव कतम एको देव इति एष एको देव एतस्यैव प्राणस्य सर्वे वेदा विभूतयः

End:

स वामदेव्योऽन्यो वा एतमेतं यथोक्तं ब्रह्म वेद प्रज्ञानात्मना। एतेनैव प्रज्ञानात्मना पूर्वे विद्वांसो अमृता अभूवन्। तथायमपि विद्वानेतेनैव प्रज्ञे(ज्ञा)नात्मना अस्माल्लोकादुत्क्रम्येत्यादि व्याख्यातम्। अस्माल्लोकादुत्क्रम्यामुष्मिन्स्वर्गे लोके सर्वान् कामानाप्त्वामृतस्समभवदित्योमिति.

Colophon :

इति श्रीमद्गोविन्दभगवत्पूज्यपादशिष्यश्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीमच्छङ्करभगवत्पादस्य कृतौ बह्वृचब्राह्मणोपनिषद्भाष्यं सम्पूर्णम् ॥

No. 331. ऐतरेयोपनिषद्भाष्यम् .
AITARĒYŌPANIṢADBHĀṢYAM.

Substance, palm-leaf. Size $17\frac{1}{2} \times 1\frac{3}{8}$ inches. Pages, 115. Lines, 6 on a page. Character, Telugu. Condition, fair. Appearance, old.

Complete.

Begins on fol. 55*a*. The other work herein is Brahmasūtrabhāṣyavyākhyā (1*a*).

The commentary of Śaṅkarācārya on the whole of the second Praśna out of the five Praśnas of the Ṛgvēdāraṇyaka. It is, however, stated on page 117 of the India Office Library Catalogue that 'according to Śaṅkara, Ait., Ār., 4-7 constitute the *Aitareyopanishad*' Extracts from the Upaniṣad portion of the commentary as also from the other portion are given below :—

Beginning :

ओम् एष पन्था इत्याद्या बह्वृचब्राह्मणोपनिषत्तस्या इदं विवरणमत्यल्पग्रन्थं सुखावबोधार्थमारभ्यते । उपनिषदित्युपनिपूर्वस्य सदेः क्विबन्तस्य विशरणगत्यवसादनार्थस्य रूपमाचक्षते । विशेषेण चोपनिषच्छब्दवाच्यात्मविद्या तादर्थ्याद्ग्रन्थोऽप्युपनिषत् देह्यस्यामात्मविद्यायां तात्पर्येणोपात्ततया वर्तते । आत्मविद्यानिष्ठानामनुविद्यादिसंसारबीजदोषमवसादयति विनाशयति । परं चात्मानं निगमयति अवबोधयति । गर्भजन्मजरारोगादींश्च निशातयति इत्यत इयमात्मविद्योपनिषत्तदुपकारकत्वात्प्राणादिविद्यानामप्युपनिषत्त्वम् । सोऽयमात्मविद्याविकरणायैष पन्था इत्यादिग्रन्थो व्याचि-

ख्यासितः। तस्यास्य कर्मकाण्डेन सह संबन्धोऽभिधीयते। सर्वोऽप्ययं वेदः प्रत्यक्षानुमानाभ्यामनवगतेष्टानिष्टप्राप्तिप्रकाशनपरः

* * * *

द्विर्वचनमुक्तप्रस्तावपरिसमाप्तिप्रदर्शनार्थमिति ।

इत्यैतरेयोपनिषद्विवरणे तृतीयोऽध्यायः

पूर्वाध्याये परिसमाप्तं कर्म सह परब्रह्मविषयविज्ञानेन सैषा कर्मणो ज्ञानसहितस्य परा गतिः उक्थविज्ञानद्वारेण उपसंहृता। एतत्सत्यं ब्रह्म प्राणाख्यमेष एको देव एतस्यैव प्राणस्य सर्वे देवा विभूतयः एतस्य प्राणस्यात्मभावं गच्छन् देवता अपि यान्ति इत्युक्तम्। सोऽयं देवताप्ययलक्षणः परः पुरुष एष मोक्षस्स चायं यथोक्तेन ज्ञानकर्मसमुच्चयसाधनेन प्राप्तव्यो नातः परमस्तीत्येके प्रतिपन्नाः। तान् निराचिकीर्षुरुत्तरं केवलात्मविद्याविधानार्थमात्मा वा इत्याह । कथं पुनरसंबन्धिकेवलात्मज्ञानविधानार्थं उत्तरो ग्रन्थः इति गम्यते अन्यार्थानवगमात्.

* * * *

अहो विचारणपूर्वं यस्मादिदमित्येव यत्साक्षादपरोक्षं ब्रह्म सर्वान्तरमपश्यन्नपरोक्षेण तस्मादिदं पश्यतीतीन्द्रो नाम परमात्मा इदन्द्रो ह वै नाम प्रसिद्धो लोके ईश्वरस्तमेवमिदन्द्रं संतमिन्द्र इति परोक्षाभिधानेनाचक्षते ब्रह्मविदस्संव्यवहारार्थं पूज्यतमत्वात् प्रत्यक्षनामग्रहणभयात् । तथा हि परोक्षप्रियाः परोक्षनामग्रहणाप्रिया इव एवं हि यस्माद्देवाः किमु सर्वदेवानामपि देवो महेश्वरः। द्विर्वचनं प्रकृताध्यायपरिसमाप्त्यर्थम् ॥

इत्यैतरेयोपनिषद्विवरणे चतुर्थोऽध्यायः

End:

तथैतेनैव प्रज्ञानात्मना पूर्वे विद्वांसो अमृता अभवन् ॥ तथायमपि विद्वानेतेनैवास्माल्लोकादुत्क्रम्य अमुष्मिन्स्वर्गे लोके सर्वान्कामानाप्त्वामृतस्समभवदित्योमिति व्याख्यातम् ॥

Colophon:

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यश्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवतः कृतौ बह्वृचब्राह्मणोपनिषद्भाष्ये द्वितीयारण्यकं समाप्तम् ।

षष्ठे तत्त्वविद्यां परिसमाप्य सप्तमे शान्तिकरमन्त्रं पठति वाङ्मे मनसीत्यादि यथोक्ततत्त्वविद्याग्रन्थपाठे प्रवृत्ता मदीया वाक् सर्वदा मनसि प्रतिष्ठिता मनसा यद्यच्छब्दजातं विवक्षितं तदेव पठति मनश्च मदीयं वाचि प्रतिष्ठितं यद्यद्विद्याप्रतिपादकत्वेन वक्तव्यं शब्दजातमस्ति तदेव मनसा विवक्ष्यते । एवमन्योऽन्यानुगृहीते वाङ्मनसे विद्याग्रन्थं साकल्येनावधारयितुं शक्नुतः ।

* * * *

पूर्वसाधनकाले शिष्याचार्ययोः पालनं प्रार्थितम् । इदानीं फलकालेऽपि प्रार्थ्यते शिष्यस्याविद्यातात्पर्यनिवृत्तिः । अनेन मन्त्रपाठेन विद्योत्पत्तेः पुरा विद्याप्रतिबन्धकाः विघ्नाः परिह्रियन्ते । अवतु वक्तारमित्यभ्यासोऽध्यायसमाप्त्यर्थः ।

इति द्वितीयारण्यके शान्तिपाठविवरणं समाप्तम् ।

विकारिनामसंवत्सरं श्रावणबहुळद्वादशी मंगळवारे देवीमानेन रुद्रंडी-कें ॥ इत्यष्टाङ्गः ॥

No. 332. ऐतरेयोपनिषद्भाष्यटिप्पणम्.

AITARĒYŌPANIṢADBHĀṢYAṬIPPAṆAM.

Substance, paper. Size, 11 × 9 inches. Pages, 31. Lines, 16 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Complete.

A gloss on the commentary of Śaṅkarācārya on the Aitarēyōpaniṣad by Jñānāmṛta-yati. This gloss is here seen to form part of Sāyaṇācārya's Vēdārthaprakāśa, dedicated to his brother

Mādhava. The current idea that Sāyaṇa took much help from others in composing his Vedic commentaries is clearly borne out by the inclusion of this gloss in his Vēdārtha-prakāśa.

Begins on fol. 21*a*. The other works herein are Candranārāyaṇīyam (1*a*), Praśnōpaniṣadbhāṣyaṭippaṇam (37*a*), Praśnōpaniṣadbhāṣyaṭippaṇam (53*a*), Rājayōgasūtrabhāṣyam (93*a*).

Beginning:

ओम् आत्मा वा इत्याद्युत्तरग्रन्थेन ब्रह्मविद्यैवोच्यत इति परिशोषयितुमुत्तरमनुवदति परिसमाप्तमिति । यच्च यावच्च कर्मजातं परब्रह्मविज्ञानश्च श्रुत्यन्तरेषु श्रुतं तत् सर्वमत्र नोक्तमित्यत आह एषेति । फलत उक्तमित्यर्थः । इदानीं पूर्वपक्षं दर्शयति तत्सत्यमिति ।

End:

अहमेव परं ब्रह्म ब्रह्मैवाहं न संशयः ।
संसारो मे तमोरूपो नासीदस्ति भविष्यति ॥

Colophon:

इति श्रीमदुत्तमामृतपूज्यपादशिष्यस्य ज्ञानामृतयतेः कृतौ श्रीमदैतरेयोपनिषद्भाष्यटिप्पणे प्रथमारण्यकं समाप्तम् ॥

अवतु वक्तारमित्यभ्यासोऽध्यायपरिसमाप्त्यर्थः द्वितीयारण्यकपरिसमाप्त्यर्थश्च ॥

इति साधारणा (सायणा)चार्यविरचिते माधवीये वेदार्थप्रकाशे ऐतरेयारण्यके सप्तमोऽध्यायः ॥

No. 333. ऐतरेयोपनिषद्भाष्यम्.

AITARĒYŌPANIṢADBHĀṢYAM.

Substance, paper. Size, 8¼ × 4⅜ inches. Pages, 70. Lines, 15 on a page. Character, Dēvanāgari. Condition, slightly injured. Appearance, old.

A portion is wanting in the beginning.

By Ānandatīrtha, according to the Dvaita school of Vēdānta.

Beginning (in the MS. as it is):

न च सर्वमतीत्याश्रतो सर्वमुक्तस्य मुक्तेरन्यत्र कामो विद्यते। सर्वलोकाधिकं च मुक्तिं विना नान्यत् । तस्मान्मुक्तैरपि भगवान् अमुक्तैरपि सर्वोत्तमत्वेन चिन्त्य इति सिद्धम् ॥

पुरुषस्थे पञ्चभूते पञ्चभूतो हरिस्स्थितः ।
प्रद्युम्नादिस्वरूपेण ज्योतिरादौ पृथक् पृथक् ॥
स एव च पुनर्वायौ पञ्चधावस्थितः प्रभुः ।
प्राणादिरूपे वसति ह्यनिरुद्धादिरूपवान् ॥
अनिरुद्धश्च प्रद्युम्नः तथा सङ्कर्षणः प्रभुः ।
वासुदेवो नारायणः पञ्चरूप इति क्रमात् ॥
पञ्चरूपोऽपि भगवान् यस्माद्वायौ विशेषतः ।
स्थितस्तेन च खादिभ्यो वायुरेव विशिष्यते ॥
अत एव पृथिव्यादिस्वरूपा मनआदयः ।
देवाः प्राणाश्रिता नित्यं गच्छन्ति प्राणमन्वपि ॥
पृथिवीमियं मनस्तत्र शेषवीरशिवेन्द्रकाः ।
कामानिरुद्धौ देवगुरुर्मनो देवास्सचन्द्रकाः ॥
श्रोत्रमाकाशरूपञ्च मित्रधर्मजलाधिपाः ॥

End:

ईशानासस्सूरयश्च निगूढान्निर्गुणोक्तिभिः ।
त्रेतायां द्वापरे चैव कलौ चैते क्रमात्त्रयः ॥
एतेषां परमो विष्णुः नेता सर्वेश्वरेश्वरः ।
स्वयंभूर्ब्रह्मसंज्ञोऽसौ परस्मै ब्रह्मणे नमः ॥ इति च ।
पूर्णागण्यगुणोदारधाम्ने नित्याय वेधसे ।
अमन्दानन्दसान्द्राय प्रेयसे विष्णवे नमः ॥

Colophon:

इति श्रीआनन्दतीर्थविरचितश्रीमन्महैतरेयोपनिषद्भाष्ये अष्टमोऽध्यायः ।

शुक्लनामसंवत्सरे उत्तरायणे शिशिरऋतौ माघमासे शुक्लपक्षे एकादश्यां गुरुवासरे व्यासदादाचार्येण लिखितं श्रीमन्महैतरेयोपनिषद्भाष्यं समाप्तम् ।

No 334. कठवल्ल्युपनिषत्.

KAṬHAVALLYUPANIṢAD.

Pages, 15. Lines, 14 on a page.

Begins on fol. 25*b* of the MS. described under No. 180.

Mṛtyu or the god of death teaches to Nacikētas the fruitlessness of worldly pleasures, the greatness of eternal freedom and the immortal and blissful nature of Ātman.

Beginning:

सह नाववत्विति शान्तिः । उशन् ह वै वाजश्रवसः सर्ववेदसन्ददौ । तस्य ह नचिकेता नाम पुत्र आस । तꣳ ह कुमारꣳ सन्तं दक्षिणासु नीयमानासु श्रद्धा विवेश । सोऽमन्यत ।

पीतोदका जग्धतृणा दुग्धदोहा निरिन्द्रियाः ।
अनन्दा नाम ते लोकास्तां स गच्छति ता ददत् । . .

End:

मृत्युप्रोक्तां नचिकेतोऽथ लब्ध्वा विद्यामेतां योगसिद्धिं च कृत्स्नाम् । ब्रह्म प्राप्तो विरजोऽभूद्विमृत्युरन्योऽप्येवं यो विदध्यात्ममेव ॥ ओं शान्तिः शान्तिः शान्तिः ॥

Colophon:

कठवल्ली समाप्ता ॥

No. 335. कठवल्ल्युपनिषत्.

KAṬHAVALLYUPANIṢAD.

Pages, 12. Lines, 13 on a page.

Complete.

Begins on fol. 76*a* of the Ms. described under No. 302.

No. 336. कठवल्ल्युपनिषत्.

KAṬHAVALLYUPANIṢAD.

Substance, palm-leaf. Size, 17 × $1\frac{1}{2}$ inches. Pages, 9. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Complete.

The Śānti given in this codex is that which begins with भद्रं कर्णेभिः and is thus different from that in No. 334.

Begins on fol. 1*a*. The other works herein are Kaṭhavallyupaniṣadbhāṣyam (6*a*), Taittirīyōpaniṣad (30*a*).

No. 337. कठवल्ल्युपनिषत्.

KAṬHAVALLYUPANIṢAD.

Pages, 13. Lines, 8 on a page.

Complete.

Begins on fol. 87*b* of the MS. described under No. 276.

No. 338. कठवल्ल्युपनिषत्.

KAṬHAVALLYUPANIṢAD.

Pages, 7. Lines, 8 on a page.

Complete.

Begins on fol. 106*a* of the MS. described under No. 304.

No. 339. कठवल्ल्युपनिषत्.

KAṬHAVALLYUPANIṢAD.

Pages, 11. Lines, 8 on a page.

Complete.

Begins on fol. 27*b* of the MS. described under No. 307.

No. 340. कठवल्ल्युपनिषत्.
KAṬHAVALLYUPANIṢAD.

Pages, 14. Lines, 6 on a page.

Begins on fol. 4*a* of the MS. described under No. 256.

Complete.

No. 341. कठवल्ल्युपनिषत्.
KAṬHAVALLYUPANIṢAD.

Pages, 13. Lines, 6 on a page.

The Upaniṣad is contained on fol. 3 to 7, 14 and 16*b* of the MS.; and this has been described under No. 300.

Complete. Same as the last.

No. 342. कठवल्ल्युपनिषद्भाष्यम्.
KAṬHAVALLYUPANIṢADBHĀṢYAM.

Pages, 48. Lines, 7 on a page.

Begins on fol. 6 *a* of the MS. described under No. 336.

The commentary is by Śaṅkarācārya.

Beginning:

उशन्ह वै वाजश्रवसः सर्ववेदसन्ददौ । अथ काठकोपनिषद्वल्लीनां सुखप्रबोधनार्थमल्पग्रन्था वृत्तिरारभ्यते । सदेर्धातोर्विशरणगत्यवसादनार्थस्योपनिपूर्वस्य न्वि(क्वि)प्प्रत्ययान्त्य(न्त)स्य रूपमुपनिषदिति । उपनिषच्छब्देन व्याचिख्यासितग्रन्थप्रतिपाद्यवेद्यवस्तुविषया विद्योच्यते ।

End:

किञ्च तेजस्विनोरावयोः यदधीतं तत्स्वधीतमस्तु । अथ वा तेजस्विनौ आवाभ्यां यदधीतं तत्तेव तेजस्वि वीर्यवदस्त्वित्यर्थः । मा विद्विषावहै ।

शिष्याचार्यावन्योन्यं प्रमादकृतान्याय्याध्ययनाध्यापनदोषनिमित्तं दोषं मा करवावहा इत्यर्थः । ओं शान्तिः शान्तिः शान्तिः इति द्विर्वचनं सर्वदोषशमनार्थम् । इत्योमिति ॥

Colophon:

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यवर्यस्य शङ्करभगवत्पादस्य कृतौ काठकोपनिषद्भाष्ये षष्ठवल्ली समाप्ता ॥

No. **343.** कठवल्ल्युपनिषद्भाष्यम्.

KAṬHAVALLYUPANIṢADBHĀṢYAM.

Pages, 79. Lines, 6 on a page.

Complete.

Begins on fol. 87*a* of the MS. described under No. 312.

By the same author. This begins as follows:

ओं नमो वैवस्वताय मृत्यवे ब्रह्मविद्याचार्याय नचिकेतसे च । अथ काठकोपनिषद्वल्लीनां &c.

The colophon is काठकोपनिषत्षष्ठवल्लीविवरणं समाप्तम् ॥

No. **344.** कठवल्ल्युपनिषद्भाष्यम्.

KAṬHAVALLYUPANIṢADBHĀṢYAM.

Pages, 50. Lines, 8 on a page.

Begins on fol. 32*a* of the MS. described under No. 311.

Complete. Same as above.

No. **345.** कठोपनिषद्भाष्यटिप्पणम्.

KAṬHŌPANIṢADBHĀṢYAṬIPPAṆAM.

Pages, 30. Lines, 6 on a page.

Complete.

Begins on fol. 56*a* of the MS. described under No. 312.

This is a gloss on Śaṅkara's commentary on the Upaniṣad by Śivānanda as may be inferred from the colophon in another copy of the same work noticed under the next number.

Beginning:

धर्माधर्माद्यसंस्पृष्टं कार्यकारणवर्जितम् ।
कालादिभिरपच्छिन्नं ब्रह्म यत्तन्नमाम्यहम् ॥

यस्साक्षात्कृतपरमानन्दो यावदधिकारं याम्ये पदे वर्तमानोऽकर्तृ-ब्रह्मात्मतानुभवबलतो भूतयातनादिदोषैरलिप्तस्वभाव आचार्यो वरप्रदानेन परब्रह्मात्मैकत्वविद्यामुपदिदेश । यस्मै चोपदिदेश ताभ्यां नमस्कुर्वन्नाचार्यभक्तेर्विद्याप्राप्त्यङ्गत्वं दर्शयति नमो वैवस्वतायेति ॥ अथ-शब्दो मङ्गलार्थः । चिकीर्षितं प्रतिजानीते काठकेति . .

End:

आत्मानं देहमधिकृत्य वर्तते इत्यध्यात्मानं(मं) प्रत्यक्स्वरूपं ब्रह्म प्राप्य विमृत्युर्भवतीति नान्यरूपमर्चिरादिमार्गगम्यं प्राप्य संयोगस्य वियोगावसानत्वादित्यर्थः ॥ एवंशब्दस्य विद्शब्देन सदा सम्बन्ध एवंविदिति ॥

Colophon:

इति शाङ्करस्य काठकोपनिषद्भाष्यस्य टिप्पणमिदं समाप्तम् ॥ ओम् ॥

No. 346. काठकोपनिषद्भाष्यटिप्पणम्.

KĀṬHAKŌPANIṢADBHĀṢYAṬIPPAṆAM.

Pages, 35. Lines, 6 on a page.

Begins on fol. 49*b* of the MS. described under No. 315.

Complete. Same as above excepting the end.

End:

एवंशब्दस्य विच्छब्देन सह सम्बन्ध इति एवंविदिति ।

Colophon:

इति शाङ्करस्य काठकोपनिषद्भाष्यस्य टिप्पणं समाप्तम् ।

पाशीकृतात्मसंसृतिराशिच्छेदप्रवृत्तचित्तानाम् ।
कोशीकृतसुकृतानां काशीप्राप्तिर्भवेन्नृणां लोके ॥
भगवत्पादभाष्यस्य भावगाम्भीर्यवेदिना ।
शिवानन्दयतीशेन टिप्पणं कृतमादरात् ॥

This last stanza is, however, found at the beginning of the work also.

No. 347. कठवल्ल्युपनिषट्टीका.

KAṬHAVALLYUPANIṢAṬṬĪKĀ.

Pages, 74. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 276.

Seven leaves are wanting in the beginning. It is so much damaged that the commentary cannot be identified. The final passage runs as follows :—

गुरुणा न सम्यग्व्याख्यातमिति शिष्यस्यापरितोषः शुश्रूषा न समचिनेति गुरोरपरितोषः तदुभयं मा भूदित्यर्थः तेषां त्रयाणामुपशमाय ईश्वरानुस्मरणपूर्वकं त्रिश्शान्तिः पठ्यते ।

Colophon:

कठवल्लीटीका समाप्ता ॥

No. 348. काठकोपनिषद्भाष्यम्.

KĀṬHAKŌPANIṢADBHĀṢYAM.

Pages, 41. Lines, 10 on a page.

Begins on fol. 1*a* of the MS. described under No. 32.

Complete.

The commentary of Ānandatīrtha in verse on the Kaṭhavallyupaniṣad.

Beginning:

नमो भगवते तस्मै सर्वतः परमाय ते ।
सर्वप्राणिहृदिस्थाय वामनाय नमो नमः ॥
अग्नौ विष्णुं सदा ध्यायन् त्रिणेऽग्निं नाचिकेतकम् ।
यः श्रयीत स तु प्राप्य स्वर्गं तत्र भयातिगः ॥
उष्य मन्वन्तरं कालममृतत्वं भजेत् क्रमात् ।
इति ब्रह्मसारे ॥
इच्छन् वाजश्रवो भक्त्या ददौ सर्वस्वदक्षिणाम् ।
औद्दालकब्राह्मणेभ्यो ददौ गाश्च निरिन्द्रियाः ॥
मान्दत्त्वापि न ते गावो दातव्या ईदृशा इति ।
उवाच पुत्रस्तं बालस्तं शशापेति (पपि) ता[स्]स्वयन् ॥
स्व(स)जगाम यमं बालो ब्रह्मचारी यमस्य तु ।
पत्न्या सम्पूज्यमानोऽपि जग्राहार्घ्यादिकं न तु ॥
आगते तु यमे प्राह यमं सोदकमाहर ।
इत्युक्तः स यमस्तन्तु सम्पूज्यादाद्वरत्रयम् ॥
सौमनस्यं पितुश्चैवं नाचिकेताग्निगं हरिन् ।
मुक्ते स्थितश्च तं विष्णुमिति प्रादाद्वरत्रयन् ॥
इति गतिसारे ।
अग्यूत्वादग्निनामासौ नाचिकेताग्निगो हरिः ।
लोको विष्णुरनन्तस्य तद्ज्ञानान्नित्य आप्यते ॥
प्रतिष्ठा सर्वलोकस्य स विष्णुस्सर्वहृद्गतः ।
स एष लोदि . . तं ज्ञात्वा मुच्यते ध्रुवम् ॥ इति च ।

या इष्टिकाः या इष्टिका देवताः ।

इष्टिकान्देवताविष्णुषष्ठ्युत्तरशतत्रिकन् ।

यथावदेव विज्ञाय मुच्यते कर्मबन्धनात् ॥

त्रिभिरेत्य सन्धिन्देवैरविरुद्धः वेदोक्तप्रमाणेन भगवत्तत्त्वादिकं जानन्नित्यर्थः । त्रिकर्मकृत् यज्ञदानतपःकर्ता ।

यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत् । इति वचनात् ।

त्रयमेतद्या इष्टिका इत्यादि ।

End:

यस्यात्मा शरीरम् । य आत्मानमन्तरो यमयतीति च । जनानां हृदये त्यक्तत्वाच्च जीवात्पृथक्शरीरीति सिद्धम् ।

देहाङ्गुष्ठमितो देहे जीवाङ्गुष्ठमितो हृदि ।

जीवस्य स तु विज्ञेयो जीवाद्भेदेन मुक्तये । इति च ।

संसारी शरीरेणाभेदो वादिना केनापि नाङ्गीकृतः न च लोकसिद्धः जनानामिति भेदात् । न जीवोऽङ्गुष्ठमात्रः अतो विष्णोर्जीवाद्भेद उक्तः । अतः सर्वोत्तमो विष्णुरिति सिद्धम् ।

नमो भगवते तस्मै विष्णवे प्रभविष्णवे ।
यस्याहमाप्त आप्तेभ्यो यो ममाप्ततमस्सदा ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं काठकोपनिषद्भाष्यं समाप्तम् ॥

No. **349.** कठोपनिषत्.

KAṬHŌPANIṢAD.

Pages, 7. Lines, 19 on a page.

Complete.

Begins on fol. 100*b* of the MS. described under No. 246.

The colophon wrongly gives to the work the name of Narōpaniṣad. It treats of the ascetic life of sannyāsa and incidentally describes the attributeless nature of the Supreme Being.

Beginning:

सह नाववत्विति शान्तिः ॥ देवा ह वै भगवन्तमब्रुवन् अधीहि भगवन् ब्रह्मविद्यां स प्रजापतिरब्रवीत् सशिखा(न) केशाम् (न्) निष्कृष्य विसृज्य यज्ञोपवीतं निष्कृष्य पुत्रन्दृष्ट्वा त्वं ब्रह्मा त्वं यज्ञः वषट्कारस्त्वमोङ्कारस्त्वं स्वाहा त्वं स्वधा त्वं दाता त्वं विधाता । अथ पुत्रो वदति ॥

End:

सर्वोपाधिविनिर्मुक्तं स्वात्मानम्भावयेत्सुधीः ।
एवं यो वेद तत्त्वेन ब्रह्मभूयाय कल्पते ॥
सर्ववेदान्तसिद्धान्तसारं वच्मि यथार्थतः ।
स्वयं मृत्वा स्वयं भूत्वा स्वयमेवावशिष्यते ॥

इत्युपनिषत् ॥

Colophon:

नरोपनिषत्समाप्ता ॥

No. **350.** कठोपनिषत्.

KATHŌPANIṢAD.

Pages, 3. Lines, 13 on a page.

Begins on fol. 152*b* of the MS. described under No. 247.

Complete. Same as the last.

No. **351.** कलिसन्तारकोपनिषत्.

KALISANTĀRAKŌPANIṢAD.

Pages, 2. Lines, 22 on a page.

Complete.

Begins on fol. 189*b* of the MS. described under No. 246.

Nārada is herein taught by Brahma the means whereby salvation is attained in the kali age; this means being the repetition of the following three names of the Supreme Being viz., Hari, Rāma and Kṛṣṇa sixteen times.

Beginning:

भद्रं कर्णेभिरिति शान्तिः ।

कलिजाबालिसौभाग्यरहस्यऋचमुक्तिका ।

द्वापरान्ते नारदो ब्रह्माणं जगाम कथं ब्रह्मन् गां पर्य-टन् कलिं सन्तरेयमिति। स होवाच ब्रह्मा। साधु पृष्टोऽस्मि सर्व-श्रुतिरहस्यं गोप्यं तच्छृणु येन कलिसंसारं तरिष्यसि

End:

पितृदेवमनुष्याणामपकारात् पूतो भवति सर्वधर्मपरित्यागपापा-त्सद्यः शुचितामाप्नुयात् सद्यो मुच्यते सद्यो मुच्यत इत्युपनिषत्

Colophon:

कलिसन्तरणोपनिषत्समाप्ता ॥

No. **352.** कलिसन्तारकोपनिषत्.

KALISANTĀRAKŌPANIṢAD.

Page, 1. Lines, 13 on a page.

Begins on fol. 185 *b* of the MS. described under No. 247.

No. 353. कलिसन्तारकोपनिषत्.
KALISANTĀRAKŌPANIṢAD.

Pages, 3. Lines, 8 on a page.

Complete.

Begins on fol. 4 *b* of the MS. described under No. 180 wherein it is named as Tārakabrahmōpaniṣad.

No. 354. कलिसन्तारकोपनिषत्.
KALISANTĀRAKŌPANIṢAD.

Pages, 2. Lines, 8 on a page.

Complete. Same as the last.

Begins on fol. 58*b* of the MS. described under No. 276 wherein it is wrongly named as Nāradōpaniṣad.

No. 355. कात्यायनोपनिषत्.
KĀTYĀYANŌPANIṢAD.

Substance, paper. Size, $7\frac{7}{8} \times 6\frac{1}{4}$ inches. Pages, 14. Lines, 14 on a page. Character Telugu. Condition, injured. Appearance, old. The leaves are fragile.

Incomplete ; Brāhmanas 1 and 2 complete.

Begins on fol. 6*a*. The other work herein is Nāradōpaniṣad.

This Upaniṣad describes the process of the evolution of the mind, of the various organs of sense and of the objects of the senses from the first Being which is conceived to be at the same time eternal, non-existent and indescribable.

Beginning:

पूर्णमद इति शान्तिः । नेव वा इदमग्रे समासीन्नेव सदासिवासिद्धि त इदमग्रे नेवासीत्तद्धकतेन्मनस एवासः । १ ।

End:

ता वा एता एकविंशबृहत्य एकविंशो वै स्वर्गो लोको बृहस्स्वर्गो लोकस्तदेष स्वर्गं लोकमभिसंपद्यते। एकविंशस्तोमं बृहतीं च छन्दः। १९।

इति द्वितीयं ब्राह्मणम् ॥

No. 356. कालाग्निरुद्रोपनिषत्.

KĀLĀGNIRUDRŌPANIṢAD.

Pages, 3. Lines, 20 on a page.

Complete.

Begins on fol. 77*a* of the MS. described under No. 250.

Kālāgnirudra explains to Sanatkumāra the efficacy of besmearing the forehead with sacred ashes and mentions how it is to be done.

Beginning:

सह नाववत्विति शान्तिः। अथ कालाग्निरुद्रोपनिषत्। संवर्तकोऽग्निर्ऋषिरनुष्टुप् छन्दः। श्रीकालाग्निरुद्रो देवता। कालाग्निरुद्रप्रीत्यर्थे जपे विनियोगः। अथ कालाग्निरुद्रं भगवन्तं सनत्कुमारः पप्रच्छ। अधीहि भगवन् त्रिपुण्ड्रविधिं सतत्त्वं किं द्रव्यं कियत्स्थानं कति प्रमाणं का रेखाः के मन्त्राः का शक्तिः किं दैवतं कः कर्ता किं फलमिति चैतं होवाच भगवान् कालाग्निरुद्रः

End:

स सततं सकलरुद्रमन्त्रजापी भवति स सकलभोगान् भुङ्क्ते देहं त्यक्त्वा शिवसायुज्यमेति न स पुनरावर्तते न स पुनरावर्तत इत्याह भगवान् कालाग्निरुद्रः। यस्त्वेतद्वाधीते सोऽप्येवमेव भविष्यतीत्यों सत्यमित्युपनिषत् ॥

Colophon:

कालाग्निरुद्रोपनिषत्समाप्ता ॥

No. **357**. कालाग्निरुद्रोपनिषत्.
KĀLĀGNIRUDRŌPANIṢAD.

Pages, 2. Lines, 10 on a page.

Complete.

Begins on fol. 35 *a* of the MS. described under No. 247.

No. **358**. कालाग्निरुद्रोपनिषत्.
KĀLĀGNIRUDRŌPANIṢAD.

Pages, 5. Lines, 5 on a page.

Complete.

Begins on fol. 16 *b* of the MS. described under No. 202.

No. **359**. कालाग्निरुद्रोपनिषत्.
KĀLĀGNIRUDRŌPANIṢAD.

Pages, 2. Lines, 7 on a page.

Complete.

There is herein another copy of the work beginning on fol. 72*a*. These are full of errors, and in the beginning the names of the Ṛṣis (sages), &c. are not given.

Begins on fol. 10*a* of the MS. described under No. 217.

No. **360**. कालाग्निरुद्रोपनिषत्.
KĀLĀGNIRUDRŌPANIṢAD.

Pages, 2. Lines, 5 on a page.

Complete.

Begins on fol. 24*a* of the work described under No. 139.

No. 361. कालाग्निरुद्रोपनिषत्.

KĀLĀGNIRUDRŌPANIṢAD.

Page, 1. Lines, 8 on a page.

Begins on fol. 10*a* of the MS. described under No. 203.

Complete.

No. 362. कालाग्निरुद्रोपनिषत्.

KĀLĀGNIRUDRŌPANIṢAD.

Pages, 2. Lines, 7 on a page.

Complete.

Begins on fol. 43*b* of the MS. described under No. 254.

This too does not give at the commencement the names of the Ṛṣis, &c.

No. 363. कालाग्निरुद्रोपनिषत्.

KĀLĀGNIRUDRŌPANIṢAD.

Pages, 3. Lines, 5 on a page.

Complete. In good condition.

Begins on fol. 31*a* of the MS. described under No. 284.

No. 364. कालाग्निरुद्रोपनिषत्.

KĀLĀGNIRUDRŌPANIṢAD.

Pages, 2. Lines, 8 on a page.

Complete.

Begins on fol. 50*b* of the MS. described under No. 276.

No. 365. कालाग्निरुद्रोपनिषत्.

KĀLĀGNIRUDRŌPANIṢAD.

Substance, palm-leaf. Size, $17\frac{3}{8} \times 1\frac{1}{2}$ inches. Pages, 2. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance not old.

Complete. The usual Śānti is not here given.

Begins on fol. 119*a*. The other works herein are :—

	Fol.
Saṁhārabhairavamantraḥ	1*a*
Ādityahṛdayam ..	1*b*
Tricārghyapradānam..	3*a*
Sūryanārāyaṇakavacam	4*a*
Nāmatrayamantraḥ ..	5*a*
Viṣṇupañjaranyāsaḥ ..	6*b*
Sudarśanamantraḥ ..	12*b*
Hanūmatkavacam ..	14*b*
Rāmacandramantraḥ..	16*b*
Śivaliṅganirṇayaḥ ..	17*a*
Uttaragītā ..	17*b*
Garbhagītā ..	24*a*
Viṣṇusahasranāmabhāṣyam	26*a*
Gāyatrīkavacaḥ ..	79*a*
Viṣṇupūjāvidhānam ..	80*a*
Kūṭayōgaḥ ..	81*b*
Brāhmamuhūrtavidhiḥ	83*a*
Dēvīpūjāvidhiḥ ..	83*a*
Mātṛkāmantraḥ ..	86*a*
Akṣaranyāsaḥ ..	86*a*
Akṣamālāprakāraḥ ..	86*a*
Nyāsapraṇava ..	87*a*
Oṅkāramantranyāsaḥ	87*a*
Bhuvanēśvarīmantraḥ	87*a*
Cintāmaṇimantraḥ ..	88*a*
Prapañcamātṛkāsarasvatībījam	88*a*
Brahmavāgīśvarīmantraḥ	89*a*
Lakṣmīgaṇapatimantraḥ	89*a*
Mahāgaṇapatimantraḥ	89*a*
Nakulīvāgīśvarīmantraḥ	90*a*
Nakulībhuvanēśvarīmantraḥ	90*a*
Mālāpañcākṣarīmantraḥ	90*a*
Bālātripuravāgīśvarīmantraḥ	91*a*
Mālātripurasundarīmantraḥ	91*a*
Nandanōdyānapūjā ..	92*a*
Lakṣmībhuvanēśvarīmantraḥ..	94*a*
Pañcadaśīsampuṭīkaraṇalakṣmīsūktam ..	95*a*
Mahālakṣmīnṛsimhamantraḥ	96*a*
Ṛṣyādinyāsaḥ ..	96*a*
Karaśuddhinyāsaḥ ..	96*a*
Pañcadaśākṣarīmahātripurasundarīmantrarājaḥ	97*a*
Ṣōḍaśanityāmantradhyānam	98*a*
Śuddhaśaktimālāmantraḥ	100*a*
Caturvimśatimahārājōpacārāḥ	101*a*
Śaktinamōmālāmantraḥ	103*a*
Śuddhaśivamālāmantraḥ	105*a*
Kiṅkiṇīstavaḥ ..	106*a*
Śāntipāṭhaḥ ..	106*a*
Śrīcakranyāsaḥ ..	108*a*
Ṣōḍaśyaṣṭōttarasatanāmāni	113*a*
Skandōpaniṣad ..	116*a*

	Fol.		Fol.
Nārāyaṇōpaniṣad ..	116*a*	Āruṇōpaniṣad ..	128*a*
Amṛtabindūpaniṣad..	117*a*	Praṇavōpaniṣad ..	129*a*
Śārīrōpaniṣad ..	117*a*	Haṁsōpaniṣad ..	129*a*
Yōgatattvōpaniṣad ..	118*a*	Sandhyāvidhiḥ ..	132*a*
Vajrasūcyupaniṣad ..	120*a*	Mahāśaktinyāsaḥ ..	141*a*
Brahmavillakṣaṇam ..	121*a*	Ghaṭikāpārāyaṇavidhiḥ	145*a*
Kaivalyōpaniṣad ..	121*a*	Mūlāsūtram ..	146*a*
Kēnōpaniṣad ..	122*a*	Gāyatrīhṛdayam ..	155*a*
Sarvasārōpaniṣad ..	124*a*	Brahmāstram ..	159*a*
Māṇḍūkyōpaniṣad ..	125*a*	Gāyatrīstōtram ..	159*a*
Garbhōpaniṣad ..	125*a*	Tripurasundarīpūjāvi-dhānam	161*a*
Brahmōpaniṣad ..	126*a*		

No. 366. कालाग्निरुद्रोपनिषत्.

KĀLĀGNIRUDRŌPANIṢAD.

Substance, palm-leaf. Size, 12 × 1¼ inches. Pages, 4. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete. No śānti is given here.

Begins on fol. 1*a*. The other works herein are:—

Maṅgalahāratīślōkaḥ (3*a*), Vibhūtidhāraṇam (4*a*), Rudrākṣadhāraṇam (6*b*), Śivapūjāvidhiḥ (8*a*), Śivanamaskārastutiḥ (13*a*,) Liṅgāṣṭakam (13*b*).

No. 367. कालाग्निरुद्रोपनिषत्.

KĀLĀGNIRUDRŌPNIṢAD.

Substance, palm-leaf. Size, 7¼ × 1⅓ inches. Pages, 5. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

Begins on fol. 1*a*. The other works herein are :—

Sāmbabhujaṅgastōtram (3*b*), Mṛtyuñjayamānasastōtram (7*b*), Bhavānīmānasastōtram (16*b*).

No. 368. कालाग्निरुद्रोपनिषत्.

KĀLĀGNIRUDRŌPANIṢAD.

Pages, 2. Lines, 8 on a page.

Begins on fol. 33*a* of the MS. described under No. 307.

Complete.

No. 369. कालाग्निरुद्रोपनिषत्.

KĀLĀGNIRUDRŌPANIṢAD.

Substance, palm-leaf. Size, $11\frac{3}{8} \times 1\frac{1}{4}$ inches. Pages, 3. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 49*b*. The other works herein are :—Bhagavadgītā (1*a*), Rāmakavaca (45*a*), Rāmadvādaśanāmastōtram (145*b*), Sāmbaśivastōtram 46*a*, Navaratnamālikāstōtram 46*b*, Kaivalyōpaniṣad 48*a*, Atharvaśikhōpaniṣad 51*a*, Atharvaśira-upaniṣad 52*b*, Cidambaranaṭanastōtram 58*a*.

Complete.

No. 370. कालाग्निरुद्रोपनिषत्.

KĀLĀGNIRUDRŌPANIṢAD.

Pages, 2. Lines, 7 on a page.

Complete.

Begins on fol. 77*b* of the MS. described under No. 256.

No. 371. कालाग्निरुद्रोपनिषत्.

KĀLĀGNIRUDRŌPANIṢAD.

Substance, palm-leaf. Size, 15⅞ × 1½ inches. Pages, 3. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

Complete.

Begins on fol. 16*a*. The other works herein are: Chandōvicitisūtram 1*a*, Sarvapṛṣṭhāptōryāmam 5*a*, Pratihārasūtram 6*a*, Saurāṣṭākṣarīmantraḥ 16*a*.

No. 372. कुण्डिकोपनिषत्.

KUṆḌIKŌPANIṢAD.

Pages, 5. Lines, 19 on a page.

Complete.

Begins on fol. 70*a* of the MS. described under No. 246.

This teaches that mental purity is essential for the attainment of salvation even in the case of ascetics who live the life of renunciation.

Beginning:

ओम् । आप्यायन्त्विति शान्तिः

ब्रह्मचर्याश्रमेऽक्षीणे गुरुशुश्रूषणे रतः ।
वेदानधीत्यानुज्ञात उच्यते गुरुणाश्रमी ॥
दारमाहृत्य सदृशमग्निमाधाय शक्तितः ।
ब्राह्मीमिष्टिं यजेत्तासामहोरात्रेण निर्वपेत् ॥

End:

निष्क्रियोऽस्म्यविकारोऽस्मि निष्कलोऽस्मि निराकृतिः ।
निर्विकल्पोऽस्मि नित्योऽस्मि निरालम्बोऽस्मि निर्द्वयः ॥

सर्वात्मकोऽहं सर्वोऽहं सर्वातीतोऽहमव्ययः ।
केवलाखण्डबोधोऽहं स्वानन्दोऽहं निरन्तरः ॥
स्वमेव सर्वतः पश्यन् मन्यमानः स्वमद्वयम् ।
स्वानन्दमनुभुञ्जानः निर्विकल्पो भवाम्यहम् ॥
गच्छन् तिष्ठन्नुपविशन् शयानो वान्यथापि वा ।
यथेच्छया वसेद्विद्वानात्मारामस्सदा मुनिः ॥ इत्युपनिषत् ।

Colophon:

इति कुण्डिकोपनिषत्समाप्ता.

No. 373. कुण्डिकोपनिषत्.

KUṆḌIKŌPANIṢAD.

Page, 1. Lines, 15 on a page.

Complete.

Begins on fol. 143*b* of the MS. described under No. 247.

No. 374. कृष्णोपनिषत्.

KṚṢṆŌPANI ṢAD.

Pages, 6. Lines, 21 on a page.

Complete.

Begins on fol. 157*a* of the MS. described under No. 246. Teaches that Kṛṣṇa is an incarnation of Viṣṇu like Rāma.

Beginning:

भद्रं कर्णेभिरिति शान्तिः

महाविष्णुं सच्चिदानन्दलक्षणं रामचन्द्रं दृष्ट्वा सर्वाङ्गसुन्दरं मुनयो वनवासिनो विस्मिता बभूवुस्तं होचुर्नोऽवद्यमवतारान्वै गण्यन्ते । आलिङ्गामो भवन्तमिति

End:

तदेतद्वेदानां रहस्यं तदेतदुपनिषदां रहस्यमेतदधीयानस्सर्वक्रतुफलं लभते शान्तिमेति मनःशुद्धिमेति सर्वतीर्थफलं लभते य एवं वेद देहबन्धाद्विमुच्यते इत्युपनिषत्। हरिः ओम्॥

Colophon:

कृष्णोपनिषत्समाप्ता॥

No. 375. कृष्णोपनिषत्.

KṚṢṆŌPANIṢAD.

Pages, 3. Lines, 12 on a page.

Complete.

Begins on fol. 174*b* of the MS. described under No. 247.

No. 376. केनोपनिषत्.

KĒNŌPANIṢAD.

Pages, 4. Lines, 5 on a page.

Complete.

Blank spaces are left here and there in the MS. perhaps owing to its having been copied from another injured MS.

Begins on fol. 1*a* of the MS. described under No. 300.

This teaches that the Brahman is the foundation and the life-giver of all beings and that all their physical and mental activities proceed from Him as the source of all power, and that the Brahman is to be known only in this manner.

Beginning:

आप्यायन्तु ममाङ्गानि वाक्पाणिच(क्प्राणश्च)क्षुः श्रोत्रमथो बलमिन्द्रियाणि च सर्वाणि सर्वं ब्रह्मोपनिषदं माहं ब्रह्म निराकुर्यांम्मा मा ब्रह्म निराकरोदनिराकरणमस्त्वनिराकरणं मेऽस्तु तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु। ओं शान्तिः

शान्तिः शान्तिः ॥ केनेषितं पतति प्रेषितं मनः । केन प्राणःप्रथमः प्रैति युक्तः ।

End:

यो वा वि (ए) तामेवं (वेदा) अपहत्य वाम्रानमनन्ते (पाप्मान-मनन्ते) स्वर्गलोके ज्येये प्रातितिष्ठति ॥

Colophon:

केनोपनिषत्समाप्ता

No. **377.** केनोपनिषत्.

KĒNŌPANIṢAD.

Pages, 5. Lines, 12 on a page.

Complete.

Begins on fol. 7*b* of the MS. described under No. 180.

No. **378.** केनोपनिषत्.

KĒNŌPANIṢAD.

Pages, 4. Lines, 15 on a page.

Complete.

Begins on fol. 1*b* of the MS. described under No. 302.

No. **379.** केनोपनिषत्.

KĒNŌPANIṢAD.

Pages, 4. Lines, 6 on a page.

Complete.

Begins on fol. 22*a* of the MS. described under No. 292.

No. 380. केनोपनिषत्.

KĒNŌPANIṢAD.

Pages, 4. Lines, 16 on a page.

Complete.

Begins on fol. 26*b* of the MS. described under No. 284.

No 381. केनोपनिषत्.

KENŌPANIṢAD.

Pages, 4. Lines, 8 on a page.

Complete.

Begins on fol. 54*a* of the MS. described under No. 276.

No. 382. केनोपनिषत्.

KĒNŌPANIṢAD.

Pages, 2. Lines, 8 on a page.

Complete.

Begins on fol. 105*b* of the MS. described under No. 304.

No. 383. केनोपनिषत्.

KĒNŌPANIṢAD.

Substance, palm-leaf. Size, 10 × $1\frac{1}{4}$ inches. Pages, 6. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, new.

Complete.

Begins on fol. 1*a*. The other works herein are: Mauktikōpaniṣad (4*a*), Mahāṇārāyaṇōpaniṣad (19*a*).

No. 384. केनोपनिषत्.

KĒNŌPANIṢAD.

Pages, 4. Lines, 7 on a page.

Complete.

Begins on fol. 21*a* of the MS. described under No. 307.

No. 385. केनोपनिषत्.

KĒNŌPANIṢAD.

Pages, 5. Lines, 6 on a page.

Complete.

Begins on fol. 2*a* of the MS. described under No. 256.

It is here called Talavakārōpaniṣad. It forms the 9th Adhyāya of the Talavakāra Brāhmaṇa of the Sāma Vēda.

No. 386. केनोपनिषत्.

KĒNŌPANIṢAD.

Pages, 4. Lines, 13 on a page.

Complete.

Begins on fol. 7*b* of the MS. described under No. 309.

Same as the last.

No. 387. केनोपनिषद्भाष्यम्.

KĒNŌPANIṢADBHĀṢYAM.

Pages, 64. Lines, 14 on a page.

Complete.

As the book is bound wrongly, it has to be read reversely from the end to the beginning.

Begins on fol. 20*a* of the MS. described under No. 302.

The Upaniṣad is herein also called Talavakārōpaniṣad.

The commentary on this Upaniṣad consists of two parts; the first part relates to the explanation of the words of the text and the second (fol. 37*a*), to the meaning of the sentences.

By Śaṅkarācārya.

Beginning of the Padabhāṣyam or word-commentary:

केनेषितमित्याद्योपनिषत्परब्रह्मविषया वक्तव्येति नवमस्याध्यायस्यारम्भः प्रागेतस्मात्कर्माण्यशेषतः परिसमापितानि समस्तकर्माश्रयभूतस्य च प्राणस्योपासनान्युक्तानि कर्माङ्गसामविषयाणि च ।

End:

अपहत्य पाप्मानं अविद्याकामकर्मलक्षणं संसारबीजं विधूयानन्ते स्वर्गलोके सुखात्मके ब्रह्मणीत्येतदनन्त इति विशेषणात् न त्रिविष्टपोऽनन्तशब्दार्थ औपचारिकोऽपि स्यादित्यत आह ज्येये इति। ज्येये ज्यायसि सर्वमहत्तरे स्वे आत्मनि मुख्य एव प्रतितिष्ठति न पुनः संसारमापद्यत इत्यभिप्रायः ।

Colophon:

इति श्रीमच्छङ्करभगवत्पादकृतं तलवकारोपनिषत्पदभाष्यं समाप्तम् ॥

Beginning of the Vākyavivaraṇam or sentence-exposition:

समाप्तं कर्मात्मभूतप्राणविषयं विज्ञानं कर्म चानेकप्रकारं ययोर्विकल्पसमुच्चयानुष्ठानाद्दक्षिणोत्तराभ्यां सृतिभ्यामावृत्यनावृत्ती भवतः । अत ऊर्ध्वं फलनिरपेक्षज्ञानकर्मसमुच्चयानुष्ठानात् कृतात्मसंस्कारस्योच्छिन्नात्मज्ञानप्रतिबन्धस्य द्वैतविषयदोषदर्शिनो निर्ज्ञाताशेषबाह्यविषयत्वात् संसारबीजमज्ञानमुच्चिच्छित्सतः प्रत्यगात्मविषयजिज्ञासोः केनेषितमित्याद्यात्मतत्त्वविज्ञानाय अयमध्याय आरभ्यते ।

End:

सर्ववेदान्तवेद्यं ब्रह्म आत्मत्वेनावगम्य तदेव ब्रह्म प्रतिपद्यत इत्यर्थः ॥

Colophon:

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यपरमहंसपरिव्राजकाचार्यस्य श्रीशङ्कराचार्यभगवतः कृतौ तलवकारोपनिषत्क्षुद्रविवरणे वाक्यविवरणं समाप्तम् ॥

No. **388**. केनोपनिषद्भाष्यम्.

KĒNŌPANIṢADBHĀṢYAM.

Pages, 49. Lines, 9 on a page.

Complete in two parts, viz., Padabhāṣya (8*a*) and Vākyavivaraṇa (21*a*).

Begins on fol. 8*a* of the MS. described under No. 311.

Same as the last.

No. **389**. तलवकारोपनिषद्भाष्यटिप्पणम्.

TALVAKĀRŌPANIṢADBHĀṢYA-ṬIPPAṆAM.

Pages, 81. Lines, 5 on a page.

Complete

Begins on fol. 15*b* of the MS. described under No. 312.

A gloss on Saṅkarācārya's Bhāṣya of the Talavakārōpaniṣad by Śivānandayati as made out from the colophon in the MS. described under No. 392.

This also is like the Bhāṣya divided into 2 parts, viz.,

पदभाष्यटिप्पणम् (15*b*) वाक्यार्थप्रधानटिप्पणम् (30*a*).

Beginning:

यच्छ्रोत्रादेरधिष्ठानं चक्षुर्वागाद्यगोचरम् ।
स्वतोऽध्यक्षं परं ब्रह्म नित्यमुक्तं भवामि तत् ॥

केनेषितमित्यादिकां तलवकारशाखोपनिषदं व्याचिख्यासुर्भगवान्भाष्यकारोऽहंप्रत्ययगोचरस्यात्मनः संसारित्वादसंसारिब्रह्मभावेऽस्योपनिषत्प्रतिपाद्यत्वासम्भवान्निर्विषयत्वादव्याख्येयत्वमाशङ्क्याहंकारसाक्षिणः संसारित्वग्राहकप्रमाणाविषयत्वात् ब्रह्मताप्रतिपादने विरोधासंभवात् सविषयत्वाद्व्याख्येयत्वं प्रतिजानीते केनेषितमित्याद्येति ।

End:

यत्कैवल्यं निर्गुणविद्याफलं तत्पूर्वोक्तमिहोपसंह्रियत इत्याह। यो वा एतामित्यादिना ।

योऽसौ सर्वेश्वरो विष्णुः सर्वात्मा सर्वदर्शनः ।
शुद्धो बोधाम्बुधिः साक्षात् सोऽहं नित्योऽभयप्रभुः ॥

Colophon:

इति शाङ्करस्य तलवकारोपनिषत्पदभाष्यस्य टिप्पणं समाप्तम् ॥

Beginning of the Vākyavivaraṇaṭīkā:

प्रयत्नाद्यन्तरेणैव मनआदेः प्रवर्तकम् ।
विदिताविदितान्यत्वसिद्धं ब्रह्माहमद्वयम् ॥

केनेषितमित्यादिकां सामवेदशाखाभेदब्राह्मणोपनिषदं पदशो व्याख्यायापि न तुतोष भाष्यकारः शारीरकैर्न्यायैरनिर्णीतार्थत्वादिति न्यायप्रधानैः श्रुत्यर्थसङ्ग्राहकैर्वाक्यैर्व्याचिख्यासुः पूर्वकाण्डेन सम्बन्धमभिधित्सुः पूर्वकाण्डार्थं संक्षेपतो दर्शयति समाप्तमिति ।

End:

ब्रह्मेति वेदः तन्मूलत्वात्तदाश्रयतपआदीनि वेदाङ्गानि अन्ते यस्याः ।

सत्यकामः स्वयं सिद्धः सर्वेशो यः स्वशक्तितः ।
स एवान्तः प्रविष्टोऽहमुपास्यः सर्वदेहिनाम् ॥

Colophon:

इति केनेषितभाष्यस्य वाक्यार्थप्रधानस्य टिप्पणमिदं समाप्तम् ।

No. 390. केनोपनिषद्भाष्यटिप्पणम्.

KĒNŌPANIṢADBHĀṢYAṬIPPAṆAM.

Pages, 48. Lines, 14 on a page.

Complete.

Begins on fol. 52*a* of the MS. described under No. 302. The second part begins on fol. 60*a*.

Same as the last.

No. **391.** केनोपनिषद्भाष्यटिप्पणम्.

KĒNŌPANIṢADBHĀṢYATIPPAṆAM.

Pages, 16. Lines, 8 on a page.

Padabhāṣya is complete.

Begins on fol. 8*a* of the MS. described under No. 314.

No. **392.** केनोपनिषद्भाष्यटिप्पणम्.

KĒNŌPANIṢADBHĀṢYATIPPAṆAM.

Pages, 76. Lines, 6 on a page.

Complete. The gloss on the second part begins on fol. 25 *a*.

Begins on fol. 12*a* of the MS. described under No. 315.

This MS. contains the following additional stanza at the end.

भगवत्पादभाष्यस्य भावगाम्भीर्यवेदिना ।
शिवानन्दयतीशेन टिप्पणं कृतमादरात् ॥

No. **393.** तलवकारोपनिषद्भाष्यम्.

TALAVAKĀRŌPANIṢADBHĀṢYAM.

Pages, 5. Lines, 10 on a page.

Begins on fol. 23*b* of the MS. described under No. 31.

This is a metrical commentary on the Upaniṣad by Ānandatīrtha.

Beginning:

अनन्तगुणपूर्णत्वादगम्याय सुरैरपि ।
सर्वेष्टदात्रे देवानां नमो नारायणाय ते ॥
वैजयन्तीसमासीनमेकान्ते चतुराननम् ।
विष्णोर्विविदिषुस्तत्त्वं पर्यपृच्छत्सदाशिवः ॥
यदिदं पुरुषावश्यं तत्र तत्र पतेन्मनः ।
केन तत्प्रेरितं याति प्राणस्सर्वोत्तमस्तथा ॥
चक्षुः श्रोत्रं तथा वाचं को देवो विजये जयेत् ।
इति पृष्टस्तदा ब्रह्मा प्राह देवमुमापतिम् ॥
ध्यात्वा नारायणन्देवं सर्वाधारमनूपमम् ।
सर्वज्ञं सर्वशक्तिश्च सर्वदोषविवर्जितम् ॥
यः प्राणस्य प्रणेता च चक्षुरादेश्च सर्वशः ।
अगम्यस्सर्वदेवैश्च परिपूर्णत्वहेतुतः ॥
प्राणादीनां प्रणेता च सर्ववेत्ता च सर्वशः ।
सर्वोत्तमश्च सर्वत्र स विष्णुरिति धार्यताम् ॥

End:

ऋग्यजुस्सामाथर्वाख्या पाञ्चरात्रञ्च भारतम् ।
मूलरामायणञ्चैव पुराणं भगवत्परम् ॥
वेदा इत्युच्यते सद्भिः शिक्षाद्यं स्मृतयस्तथा ।
अङ्गानि सत्यं मीमांसा तद्विद्यायतनत्रयम् ॥ इति विद्यानिर्णये ।
यश्चिदानंदसच्छक्तिसम्पूर्णो भगवान्परः ।
नमोऽस्तु विष्णवे तस्मै प्रेष्ठाय प्रेयसाञ्च मे ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं श्रीमत्तलवकारोप-
निषद्भाष्यं समाप्तम् ।

No. 394. तलवकारोपनिषद्भाष्यम्.

TALAVAKĀRŌPANIṢADBHĀṢYAM.

Pages, 6. Lines, 13 on a page.

Complete.

Begins on fol. 5*a* of the MS. described under No. 309.

Same as the last.

No. 395. कैवल्योपनिषत्.

KAIVALYŌPANIṢAD.

Pages, 4. Lines, 21 on a page.

Complete.

Begins on fol. 2*b* of the MS. described under No. 250.

This Upaniṣad teaches that salvation is to be attained only by realising that Śiva or Nīlakaṇṭha of innumerable attributes and powers is identical with the attributeless Self.

Beginning:

सह नाववत्विति शान्तिः ।

अथाश्वलायनो भगवन्तं परमेष्ठिनं परिसमेत्योवाच । अधीहि भगवन्ब्रह्मविद्यां वरिष्ठां सदा सद्भिः सेव्यमानां निगूढां यथाचिरात्सर्वपापं व्यपोह्य परात्परं पुरुषमुपैति विद्वान् । तस्मै स होवाच पितामहश्च श्रद्धाभक्तिध्यानयोगादवेहि । न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः । परेण नाकं निहितं गुहायां विभ्राजते यद्यतयो विशन्ति ॥

End:

अनेन ज्ञानमाप्नोति संसारार्णवनाशनम् ।
तस्मादेवं विदित्वैनं कैवल्यं फलमश्नुते ॥

कैवल्यं फलमश्नुत इति ।

Colophon:

कैवल्योपनिषत्समाप्ता ।

No. **396.** कैवल्योपनिषत्.

KAIVALYŌPANIṢAD.

Pages, 2. Lines, 11 on a page.

Begins on fol. 1*b* of the MS. described under No. 247.

No. **397.** कैवल्योपनिषत्.

KAIVALYŌPANIṢAD.

Pages, 4. Lines, 5 on a page.

Complete.

Begins on fol. 27*a* of the MS. described under No. 139.

No **398.** कैवल्योपनिषत्.

KAIVALYŌPANIṢAD.

Pages, 5. Lines, 6 on a page.

Complete.

Begins on fol. 12*a* of the MS. described under No. 217. There is another copy of this work beginning on fol. 47*a* of this MS.

No. **399.** कैवल्योपनिषत्.

KAIVALYŌPANIṢAD.

Pages, 2. Lines, 10 on a page.

Complete.

Begins on fol. 1*a* of the MS. described under No. 203.

No. 400. कैवल्योपनिषत्.

KAIVALYŌPANIṢAD.

Pages, 3. Lines, 5 on a page.

Complete.

Begins on fol. 18*a* of the MS. described under No. 300.

No. 401. कैवल्योपनिषत्.

KAIVALYŌPANIṢAD.

Substance, palm-leaf. Size, 11¾ × 1¼ inches. Pages, 8. Lines, 4 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

Begins on fol. 4*a*. The other works herein are:—

Brahmōpaniṣad (1*a*), Jābālōpaniṣad (7*b*), Ātmabōdhaprakaraṇam (13*a*), Kṛṣṇāṣṭōttaraśatanāmastōtram (24*a*), Taittirīyōpaniṣad (27*a*), Vaiśvadēvavidhiḥ (45*a*), Gāyatrīhṛdayam (48*a*), Aṣṭākṣarīmantraḥ (56*a*), Gītagōvindam (57*a*), Bālarāmāyaṇam (66*a*), Nārāyaṇāṣṭākṣarīmantraḥ (75*a*), Darśasthālīpākavidhiḥ (83*b*).

No. 402. कैवल्योपनिषत्.

KAIVALYŌPANIṢAD.

Pages, 4. Lines, 5 on a page.

Complete.

Begins on fol. 26*a* of the MS. described under No. 292.

No. 403. कैवल्योपनिषत्.

KAIVALYŌPANIṢAD.

Pages, 4. Lines, 5 on a page.

Incomplete.

Begins on fol. 9*a* of the MS. described under No. 322.

No. 404. कैवल्योपनिषत्.
KAIVALYŌPANIṢAD.

Pages, 4. Lines, 5 on a page.

Complete. Same as the last.

Begins on fol. 24*a* of the MS. described under No. 284.

No. 405. कैवल्योपनिषत्.
KAIVALYŌPANIṢAD.

Pages, 4. Lines, 7 on a page.

Complete.

Begins on fol. 29*a* of the MS. described under No. 254.

No. 406. कैवल्योपनिषत्.
KAIVALYŌPANIṢAD.

Pages, 4. Lines, 6 on a page.

Complete.

Begins on fol. 16*a* of the MS. described under No. 116.

No. 407. कैवल्योपनिषत्.
KAIVALYŌPANIṢAD.

Pages, 3. Lines, 12 on a page.

Complete.

Begins on fol. 38*b* of the MS. described under No. 276.

Fol. 39*a* is left unwritten.

No. 408. कैवल्योपनिषत्.
KAIVALYŌPANIṢAD.

Substance, palm-leaf. Size, $7\frac{1}{4} \times 1\frac{1}{8}$ inches. Pages, 7. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

Begins on fol. 37*a*. The other works herein are :—

	Fol.		Fol.
Pañcakrōśayātrāmañjarī ..	1*a*	Śanaiścarastōtram ..	21*a*
Dakṣiṇāmūrtikavacam ..	7*a*	Gaṅgāstōtram ..	24*a*
Gāyatrīrāmāyaṇam ..	11*a*	Śivakavacam ..	27*a*
